श्री दशाक्षर लक्ष्मी मंत्रं

अस्य श्रीदशाक्षरीमहामंत्रस्य -

दक्ष ऋषिः - विराट् छंदः - श्रीलक्ष्मीः देवता -

सर्वेष्टसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादि न्यासः

दक्ष ऋषये नमः शिरसि - विराट् छंदसे नमः मुखे

श्रियै देवतायै नमः हृदि - विनियोगाय नमः सर्वांगे

करन्यासः

ॐ देव्यै नमः अंगुष्टाभ्यां नमः ।

ॐ पद्मिन्यै नमः तर्जनीभ्यां नमः ।

ॐ विष्णुपत्न्यैनमः मध्यमाभ्यां नमः ।

ॐ वरदायैनमः अनामिकाभ्यां नमः ।

ॐ कमलायै नमः कनिष्ठिकाभ्यां नमः ।

ॐ कमलवासिन्यै नमः ।

ॐ करतलकरपृष्ठाभ्यां नमः ॥

नेत्रहीनहृदयादि पंचांगन्यासः

ॐ देव्यै नमः हृदयाय नमः ।

ॐ पद्मिन्यै नमः शिरसे स्वाहा ।

ॐ विष्णुपत्न्यैनमः शिखायै वषट् ।

ॐ वरदायै नमः कवचाय हुं ।

ॐ कमलवासिन्यै नमः अस्त्राय फट् ।

ॐ भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं ।

आसीना सरसीरुहे स्मितमुखी हस्तांबुजैर्बिभ्रति

दानं पद्मयुगाभये च वपुषा सौदामिनीसन्निभा ।

मुक्ताहारविराजमानपृथुलोत्तुंगस्तनोद्भासिनी

पायाद्वः कमला कटाक्षविभवैरानंदयंती हरिं ॥

(एवं ध्यात्वा पीठशक्तिभिः पीठपूजां कृत्वा स्वर्णादि निर्मितं यंत्रं
अस्त्रमंत्रेण आसनं दत्वा पीठमध्ये संस्थाप्य पुनर्ध्यात्वा
मूलेन मूर्तिं प्रकल्प्य, आवाहनादि पुष्पाक्षतैः उपचारैः संपूज्य
देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ।)

षट्कोण केसरेषु -
आग्नेयकोणे ॐ देव्यै नमः हृदयाय नमः ।
निर्ऋतिकोणे ॐ पद्मिन्यै नमः शिरसे स्वाहा ।
वायव्यकोणे ॐ विष्णुपत्न्यै नमः शिखायै वषट् ।
ईशान्यकोणे ॐ वरदायै नमः कवचाय हुं ।
देवी पश्चिमे कोणे ॐ कमलवासिन्यै नमः अस्त्राय फट् ।
इति पंचांगानि पूजयेत् ततः पुष्पांजलिं आदाय मूलमंत्रं उच्चार्य,
ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं ॥

इति पुष्पांजलिं विकीर्य विशेषार्घ्यात् बिंदुं निक्षिप्य पूजिताः तर्पिताः संतु
इति वदेत् - ततः अष्टदलपद्मेषु -
पूर्वे ॐ बलाक्यै नमः ।
आग्नेये ॐ विमलायै नमः ।
दक्षिणे ॐ कमलायै नमः ।
नैर्ऋत्यै ॐ विभीषिकायै नमः ।
पश्चिमे ॐ मालिकायै नमः ।
वायव्ये ॐ शांकर्यै नमः ।
उदीच्यां ॐ वसुमालिकायै नमः ।
ईशान्ये ॐ वनमालिकायै नमः ।
इति भक्त्या पूजयित्वा पुष्पांजलिं गृहीत्वा,
ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनं ॥

ततः भूपुरे क्रमेण -
पूर्वे ॐ वं वज्राय नमः ॐ इंद्राय नमः ।
आग्नेये ॐ शं शक्तये नमः ॐ अग्नये नमः ।
दक्षिणे ॐ दं दंडाय नमः ॐ यमाय नमः ।

नैर्ऋत्ये ॐ खं खड्गाय नमः ॐ निर्ऋतये नमः ।
पश्चिमे ॐ पं पाशाय नमः ॐ वरुणाय नमः ।
वायव्ये ॐ अं अंकुशाय नम ॐ वायवे नमः ।
उत्तरे ॐ गं गदायै नमः ॐ कुबेराय नमः ।
ईशान्ये ॐ त्रिं त्रिशूलाय नमः ॐ ईशानाय नमः ।
(इति भक्त्या पूजां कृत्वा धूपादि नीराजनानंतरं पूज्य
हस्ते पुष्पांजलिं गृहीत्वा -)
ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनं ॥

अथ दशाक्षरलक्ष्मी मंत्रः ।

ॐ नमः कमलवासिन्यै स्वाहा ।

जपप्रकारः
दशलक्षं जपेन्मंत्रं मंत्रविद्विजितेंद्रियः ।
दशांशं जुहुयान्मंत्री मधुनाऽऽक्तैः सरोरुहैः ॥

इति संपूजयेद्देवीं संपदामालयं भवेत् ।
समुद्रकन्यां सरिति कंठमात्रे जले स्थितः ॥

त्रिलक्षं प्रजपेन्मंत्री साक्षाद्भैश्रवणो भवेत् ।
आराध्योत्तरनक्षत्रे देवीं स्रक्चंदनादिभिः ॥

नंद्यावर्त्तभवैः पुष्पैः सहस्रं जुहुयात्ततः ।
पूर्णमास्यां फलैः चित्रैः जुहुयान्मधुराप्लुतैः ॥

पंचम्यां विशदांभोजैः शुक्रवारे सुगंधिभिः ।
अन्यैर्वा विशदैः पुष्पैः प्रतिमासं फलावतीः ॥

स भवेदब्दमात्रेण सर्वदा संपदां निधिः ॥

इति दशाक्षरलक्ष्मीमंत्रं संपूर्णं ।